# Shri Veda Vyasa Gadyam

# શ્રીવેદવ્યાસગદ્યમ્

## Document Information

Text title : Shri Veda Vyasa Gadyam

File name : vedavyAsagadyam.itx

Category : deities_misc, gurudev, gadyam

Location : doc_deities_misc

Author : Yadavarya

Transliterated by : Krishnananda Achar

Proofread by : Krishnananda Achar

Latest update : May 15, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# શ્રીવેદવ્યાસગદ્યમ્

શુદ્ધાનન્દોરુસંવિદ્દ્યુતિબલબહુલૌદાર્યવીર્યસૌન્દર્ય પ્રાગલ્ભ્ય
સ્વાતન્ત્રાદ્યનન્તપૂર્ણગુણાત્મક વિગ્રહાય । તાદૃશાનન્ત રૂપાય ।
પારતન્ત્ર્યાદ્યશેષદોષદૂરાય । અનન્તાનન્ત રૂપેષુ સ્વગતાનન્તાનન્ત
ગુણક્રિયારૂપ ભેદવિવર્જિતાય । સ્વનિર્વાહક સ્વાભિન્ન વિશેષબલાત્
તદ્વત્ત્વ વ્યવહારભાગિને । અચિન્ત્યશક્તિસમ્પન્નાય । રમાબ્રહ્મ
રુદ્રેન્દ્રાદિ સકલ જીવજડાત્મક પ્રપઞ્ચદાત્યન્ત ભિન્ન સ્વરૂપાય ।
પઞ્ચભેદભિન્ન શ્રીબ્રહ્મરુદ્ર પ્રભૃતિ સકલ સુરાસુર
નરાત્મકસ્ય પ્રપઞ્ચસ્ય યથાયોગ્યં સૃષ્ટિ સ્થિતિ સંહાર નિયમન
જ્ઞાનાજ્ઞાન બન્ધ મોક્ષ પ્રદાત્રે । ઋગાદિ ચતુર્વેદ મૂલ રામાયણ
બ્રહ્મસૂત્ર મહાભારત પઞ્ચરાત્રાદ્યશેષ સદાગમ પ્રતિપાદિત
સ્વરૂપાય । અનાદ્યનન્તકાલેપિ સ્વરૂપદેહાન્તર્બાહ્ય દેહાન્તશ્ચ
સ્થિત્વા સત્યાપ્રતીતિ પ્રવૃત્યાદિપ્રદાય । સર્વસ્વામિને । ગુરુષુ
સ્થિત્વા તદ્દ્વારા જ્ઞાનોપદેષ્ટ્રે । નિરવધિકાનન્તાનવદ્ય કલ્યાણ
ગુણત્વજ્ઞાનપૂર્વક સ્વાત્માત્મીય સમસ્ત વસ્તુભ્યોનેક ગુણાધિકાન્તરાય
સહસ્રેણાપ્યપ્રતિબદ્ધ નિરન્તર પ્રેમ પ્રવાહરૂપ ભક્તિ વિષયાય ।
અનન્તવેદોક્ત તદનુક્ત ભારતોક્ત પ્રકારેણ બ્રહ્મોપાસિતાનન્ત
ગુણાનન્ત ક્રિયાનન્ત રૂપાય । ક્રિયા સામાન્યેન સરસ્વત્યુપાસિતાનન્ત
રૂપાય । ગુણક્રિયા સામાન્યેન રુદ્રોપાસિતાનન્ત રૂપાય । ગુણક્રિયા રૂપ
સામાન્યેન ઇન્દ્રાદ્યુપાસિત બહુગુણાય । કર્મક્ષયોત્ક્રાન્તિમાર્ગ ભોગરૂપ
ચતુર્વિધ મુક્તિયોગ્ય મનુષ્યોત્તમોપાસિત સચ્ચિદાનન્દાત્માખ્ય
ચતુર્ગુણાય । ઉત્ક્રાન્તિ માર્ગરૂપ મુક્તિદ્વય શૂન્યાવશિષ્ટ
દ્વિવિધ મુક્તિયોગ્યાધિકારિ વિશેષોપાસિત આત્મત્વરૂપૈક ગુણાય ।
બ્રહ્માદિ માનુષોત્તમાન્તાનામુપાસનાનુસારેણ યથાયોગ્યં સઞ્જાત
વિચિત્રાપરોક્ષજ્ઞાન વિષયાય । અત્યર્થ પ્રસાદ કર્ત્રે ।
અપરોક્ષજ્ઞાન મહિમ્નાગ્નિના તૂલરાશિવદ્ભસ્મીભૂત પ્રારબ્ધ

પુણ્યપાપાનિષ્ટકામ્યકર્મણાં બ્રહ્મોપદેશાનાં વાતપુત્રીયતા
પ્રસઙ્ગ પરિહારાય ભગવતાવશેષિત ભોગેન નિઃશેષીકૃત
પારબ્ધ કર્મણાં સત્યલોકે ચતુર્મુખાખ્ય કાર્યબ્રહ્મપ્રાપ્તાનાં
પ્રતીકાલમ્બનાનાં વૈકુણ્ઠ લોકસ્થિત ભગવદાખ્યા કાર્યબ્રહ્મ
પ્રાપ્તાનાં અપ્રતીકાલમ્બનાનાં મહાપ્રલયે ચતુર્મુખં પ્રાપ્તાનાં
સ્વોત્તમ પ્રવેશદ્વારા શેષમાર્ગ ગરુડમાર્ગાભ્યાં ગતાનાં દેવાનાં
ચ બ્રહ્મણાસહ વિરજાસ્નાનેન લિઙ્ગભઙ્ગ પ્રાપયિત્વા આવિર્ભૂત
વિચિત્ર સ્વરૂપાનન્દાનુભવદાત્રે । બ્રહ્માદ્યેકાન્ત ભક્તાનાં
નિરુપાધિકેષ્ટાય । તદિતરભક્તાનાં મોક્ષ્ટોદ્દેશેન ભજનીયાય ।
સાકિલ્યેન રમાબ્રહ્માદ્યચિન્ત્ય સ્વરૂપાય । વ્યાખ્યાશ્રી સર્વવિજ્ઞાન
કવિતા વિજયાદિ સદ્ગુણ પ્રદાત્રે । બ્રહ્મસૂત્ર મહાભારત
શ્રીમદ્ભાગવતાદ્યશેષ સચ્છાસ્ત્રકર્ત્રે । વિષ્ણુનામ્નિસંહિતા
દેવતાત્વેન હ્રસ્વમાણ્ડૂકેયોપાસિતાય । વાસુદેવાદિ ચતૂરૂપાય ।
મત્સ્યકૂર્મ વરાહ નારસિંહ વામનભાર્ગવ રાઘવ કૃષ્ણ બુદ્ધ
કલ્કિ સ્વરૂપાય । શ્રીમદ્ધનુમત્સેવ્ય દાશરથિ રામાત્મકાય
દ્રૌપદીપ્રિય ભીમસેનારાધ્ય શ્રીયાદવકૃષ્ણ સ્વરૂપિણે ।
ઋદન્દશ્વાત્મક શ્રીહયગ્રીવ સ્વરૂપાય । જાગ્રદાદ્યવસ્થા
પ્રવર્તક વિશ્વાદિત્રિતય રૂપાય । ષટ્શતૈકવિંશત્સહસ્ર
શ્વાસરૂપ હંસમન્ત્ર જપ પ્રેરકાય । દ્વાસપ્તતિ સહસ્રનાડીષુ
મધ્યે દક્ષિણ ભાગસ્થિત ષટ્ત્રિંશતૃહસ્ર પુરુષ રૂપાત્મકાય ।
વામભાગસ્થિત ષટ્ત્રિંશત્સહસ્ર સ્ત્રીરૂપાત્મકાય । પરમહંસોપાસ્ય
તુરીય રૂપિણે । આત્માદિ ચતુરૂપિણે । કૃદ્ધોલ્કાદિ પઞ્ચરૂપિણે ।
કપિલ દત્તાત્રેય ઋષભ નારાયણ હરિકૃષ્ણ તાપસ મનુ મહિદાસ
યજ્ઞ ધન્વન્તરી નારાયણી સનત્કુમાર ધવલપક્ષ વિરાજિત હંસ
સ્વરૂપાય । કેશવાદિ ચતુર્વિંશતિવ્યૂહાય । નારાયણ નરશૌર્યાદિ
શતરૂપિણે । વિશ્વ વિષ્ણુ વષટ્કારાદિ સહસ્રરૂપિણે । પરાદિ
બહુરૂપિણે । અજિતાદ્યનન્તરૂપિણે । કલિકાલ પ્રવૃત્તયે ઋષિભિઃ
સહાન્તર્ધાય ગન્ધમાદનપર્વતસ્થિત બદરિકાશ્રમ નિવાસિને ।
બાદરાયણાય । બાદરિ જૈમિનિ સુમન્તુ વૈશમ્પાયન કાશકૃત્સ્નલોમશ
કાષ્ણાર્જિન્યૌડુલોમ્યાત્રેયપૂર્વક શિષ્યસઙ્ઘ પરિવૃતાય ।
કીરપદ મુનિનુતાય । સ્વાજ્ઞાનુસારેણાવતરિતકૃત સમસ્ત કાર્ય
પરિત્યક્ત ભૂમણ્ડલ પ્રાપ્ત બદરિકાશ્રમ મરુદવતારાનન્દતીર્થ

પૂર્ણપ્રજ્ઞાપર પર્યાય શ્રીમધ્વાચાર્ય સંસેવિત શ્રીચરણાય ।
સાત્યવતેયાય । પારાશર્યાય । કૃષ્ણ દ્વૈપાયનાય । જીવાન્તઃ સ્થિત્વા
સર્વકર્મકારયિત્રે । અશેષ સત્કર્મ ફલદાત્રે । તત્ત્વદેવતા
પ્રેરકાય । અસ્મત્કુલદેવતાત્મક શ્રીવેઙ્કટેશાત્મને । અનન્તાય ।
ઇન્દિરાપતયે । અસ્મદ્ગુરુવરાચાર્ય કરવર પૂજિત ચરણનલિનયુગલાય ।
અસ્મદ્ગુરુવર્યાન્તર્ગત શ્રીમદાનન્દતીર્થાર્ય હૃત્કમલમધ્યનિવાસિને ॥

વિજ્ઞાનરોચિઃ પરિપૂરિતાન્તર્બાહ્યાણ્ડકોશાય । અકારાદિ
પઞ્ચાશદ્વર્ણ દેવતાજાદિભિઃ સ્વર્ણઘટ પરિપૂર્ણ પીયૂષ સિક્તાય ।
શુભમરકત વર્ણાય । રક્તપાદાબ્જ નેત્રાધરકરનખરસનાગ્રાય ।
શઙ્ખ ચક્ર ગદાપદ્મ ધરાય । પરમ સુન્દરાય । રુચિરવરૈણ
ચર્મણા ભાસમાનાય । તટિદમલજટા સન્દીપ્ત ચૂડં દધાનાય ।
નીલાલક સહસ્ત શોભિત મૂર્ઘ્ને । સુવ્યક્તશ્મશ્રુમણ્ડલાય । લલાટ
શોભિત તિલકાય । અમ્ભોજભવભવાદિ ભુવનાનાં દભ્રવિભ્રમાદેવ
વિભવાભિવવોદ્ભવાદિ પારમેષ્ઠ્યાદિ પદવિમુક્તિદાતૃભ્રૂ
વિલાસાય । કમલાયતલોચનાય । નિખિલાઘૌઘ વિનાશક પરસૌખ્ય
પ્રદદૃષ્ટયે । તુલસી ભાસિત કર્ણાય । સમસ્ત વેદોદ્ગીરણ હેતુભૂત
શ્રીમુખાય । અવનતાખિલલોક શોકસાગરવિશોષકાત્યુદારમન્દહાસાય ।
અરુણોષ્ઠરોચિષારુણીકૃત સિતદન્ત પઙ્ક્તયે । કમ્બુવદ્રેખાત્રયોપેત
બ્રહ્માધિષ્ઠિત કૌસ્તુભરત્નોદ્ભાસિત કણ્ઠાય । શ્રીવત્સાઙ્કિત
શ્રીદેવ્યાસ્પદ વિસ્તીર્ણ વક્ષસે । તનુત્વેપ્યન્તર્ગત જગદણ્ડમણ્ડલ
વલિત્રયાઙ્કિતોદરાય । હરિન્મણિકાન્તિ મુઙ્ખિશદ હારમયૂખ
ગૌરસ્તનદ્વયોપેતાય । આત્મયોનિધિષણ ચતુર્દશ ભુવન
કારણદલોપેત પદ્મજનક તનુનિમ્નાવર્તનાભિસરસે । ત્રયીમય
યજ્ઞોપવીત ધારિણે । દિવ્ય મૌઞ્જીધારણે । અચલ પરમાજિન
યોગ પીઠોપવિષ્ટાય । પરિતઃ સ્થિતવર પટ્ટિકા રૂપકક્ષાયુતાય ।
સ્વભક્તાજ્ઞાનનાશક તર્કાપરપર્યાય પ્રબોધમુદ્રાયુત પૃથુપીવર
વૃત્ત દક્ષિણહસ્તાય । સ્વભક્ત ભયભઞ્જક સમસ્ત
મઙ્ગલપ્રદાભય મુદ્રાયુત પૃથુપીવર વૃત્ત સવ્યહસ્તાય ।
અતસિકા કુસુમાવ ભાસોરુદ્વયાય । ક્રમાલ્પવૃત્તજઙ્ઘાયુગલાય ।
નિગૂઢ ગુલ્ફાય । બાહ્યાન્તસ્તમો વિનાશક પરસૌખ્ય પ્રદનખમણયે ।
વજ્રાઙ્કુશધ્વજ પદ્મરેખા ચિહ્નિત પાદપદ્માય । સમસ્ત

પીઠદેવતાવરણ દેવતાસેવ્યાય । અનન્તચન્દ્રાધિકકાન્તિમતે ।
સમસ્ત દુરિત નિવારણાય । સમસ્ત કામિત ફલદાત્રે મદુપાસ્યાય ।
શ્રીવેદવ્યાસાય નમો નમઃ ॥

ઇતિ શ્રીમદ્વેદેશતીર્થ પૂજ્યપાદારાધક યાદવાર્યકૃતં
શ્રીવેદવ્યાસગદ્યં સમ્પૂર્ણમ્ ।

Encoded and proofread by Krishnananda Achar

---

*Shri Veda Vyasa Gadyam*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*